१०० / ८

'अथ'

100 / 8

ग्रन्थनाम:-	"बृहदारण्यकोपनिषत्"	(पंचमषष्ठाध्यायौ)
	. . . Brahadaranya Kopanishad	
कर्तृनाम:-		
विषय:-	'वैदिकसाहित्यम्'	

179

श्रीगणेशायनमः॥हरिः ॐ पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमुदच्यते॥
पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यते॥ॐ॥ॐ खंब्रह्मखंपुरा
णंवायुरंखमितिहस्माहकौरव्यायणीपुत्रोवेदोयंब्राह्मणाविदु
र्वेदैनेनयद्वेदितव्यं॥१॥ब्राह्मणं॥१॥त्रयाःप्राजापत्याःप्रजापतौ
पितरिब्रह्मचर्यमूषुर्देवामनुष्याअसुराउषित्वाब्रह्मचर्यंदेवा
ऊचुर्ब्रवीतुनोभवानितितेभ्योहैतदक्षरमुवाचदइतिव्यज्ञा
सिष्टा३इतिव्यज्ञासिष्मेतिहोचुर्दाम्यतेतिनआत्थेत्योमितिहो
वाचव्यज्ञासिष्टेति॥१॥अथहैनंमनुष्याऊचुर्ब्रवीतुनोभवानि
तितेभ्योहैतदेवाक्षरमुवाचदइतिव्यज्ञासिष्टा३इतिव्यज्ञा

६२ सिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टे
ति॥२॥ अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैत
देवाक्षरमुवाच द इति व्यज्ञासिष्टा३ व्यज्ञासिष्मेति होचुर्दय इति
ध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति॥ तदे तदे
वैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्व
मिति तदेतत्त्रयं शिक्षेद्दमं दानं दयामिति॥३॥ इति द्वितीयं ब्राह्मणं॥२॥
एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरं हृदयमि
ति हृ इत्येकमक्षरमभिहरंत्यस्मै स्वाश्चान्ये च य एवं वेद द इत्ये १
कमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्व
क्षे१

गं लोकं य एवं वेद ॥३॥ तृतीयं ब्राह्मणं ॥३॥ तद्वै तदेतदेव तदास
सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयती
मांल्लोकान् जित इन्न्वसावसद्य एवमेतं महद्यक्षं प्रथमजं वेद
सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म ॥४॥ चतुर्थं ब्राह्मणं ॥४॥ आप एवेद
मग्र आसुस्ता आपः सत्यमसृजंत सत्यं ब्रह्मं प्रजापतिं प्रजा ब्र॰ ५
पतिर्देवांस्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरं सत्य
मिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथ
मोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्ये
न परिगृहीतं सत्यभूयमेव भवति नैनं विद्वांसमनृतं

८३ हिनास्ति॥१॥तद्यत्तत्सत्यमसौसआदित्योयएषएतस्मि
न्मंडलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषस्तावेतावन्योन्यस्मि
न्प्रतिष्ठितौरश्मिभिरेषोस्मिन्प्रतिष्ठितःप्राणैरयममुष्मिन्स
यदोत्क्रमिष्यन्भवतिशुद्धमेवैतन्मंडलंपश्यतिनैनमेतेरश्मयः न
प्रत्यायंति॥२॥यएषएतस्मिन्मंडलेपुरुषस्तस्यभूरिति
शिरएकं॰शिरएकमेतदक्षरंभुवइतिबाहूद्वौबाहूद्वेएते
अक्षरेस्वरितिप्रतिष्ठाद्वेप्रतिष्ठेद्वेएतेअक्षरेतस्योपनिष २
दहरितिहंतिपाप्मानंजहातिचयएवंवेद॥३॥योयंदक्षि

ॐ

क्षन्पुरुषस्तस्यभूरितिशिरएकंशिरएकमेतदक्षरंभुव
इतिबाहूद्वौबाहूद्वेएतेअक्षरेस्वरितिप्रतिष्ठाद्वेप्रतिष्ठेद्वेएते
अक्षरेतस्योपनिषदहमितिहंतिपाप्मानंजहातिचयएवंवेद ॥
३ ॥ पंचमंब्राह्मणं ॥ मनोमयोयंपुरुषोभाःसत्यस्तस्मिन्नंतर्हृद
ये यथाव्रीहिर्वायवोवासएषसर्वस्येशानःसर्वस्याधिपतिःसर्व
मिदंप्रशास्तियदिदंकिंच ॥ षष्ठंब्राह्मणं ॥ विद्युद्ब्रह्मेत्याहुर्विदाना
द्विद्युद्विद्युत्येनंपाप्मनोयएवंवेदविद्युद्ब्रह्मेतिविद्युद्ध्येव
ब्रह्म ॥ १ ॥ सप्तमंब्राह्मणं ॥ वाचंधेनुमुपासीततस्याश्चत्वा

हि ५

रः स्तनाः स्वाहाकारो वषट्कारो हंतकारः स्वधाकारस्तस्यै द्वौ
स्तनौ देवा उपजीवंति स्वाहाकारं च वषट्कारं च हंतकारं मनु
ष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥ १ ॥ अ
ष्टमं ब्राह्मणं ॥ अयमग्निर्वैश्वानरो योऽयमंतः पुरुषे येनेदम
न्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यदेतत्कर्णाव
पिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोति
॥ १ ॥ नवमं ब्राह्मणं ॥ यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमा
गच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन ३

सऊर्द्ध्वआक्रमतेसआदित्यमागछतितस्मैसतत्रविजिही
तेयथालंबरस्यखंतेनसऊर्द्ध्वआक्रमतेसचंद्रमसमागछ-
तितस्मैसतत्रविजिहीतेयथादुंदुभेःखंतेनसऊर्द्ध्वआक्रमते
सलोकमागछत्यशोकमहिमंतस्मिन्वसतिशाश्वतीःसमाः॥१
॥दशमंब्राह्मणं॥एतद्वैपरमंतपोयद्व्याहितस्तप्यतेपरमं
हैवलोकंजयतियएवंवेदएतद्वैपरमंतपोयंप्रेतमरण्यंहरं
तिपरमंहैवलोकंजयतियएवंवेदएतद्वैपरमंतपोयंप्रेत
मग्नावभ्यादधातिपरमंहैवलोकंजयतियएवंवेद॥१॥

एकादशं ब्राह्मणं ॥ अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पू
यति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न
तथा शुष्यति वै प्राण ऋतेऽन्नादेते ह त्वेव देवते एकधाभूयं
भूत्वा परमतां गच्छतस्तद्ध स्माह प्रातृदः पितरं किꣳस्विदेवै
वं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति स ह स्माह
नि पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां
गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै व्यन्ने हीमानि स
र्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि स ४

वीणि भूतानि रमंते सर्वाणि ह वा अस्मिन्भूतानि विशंति सर्वा
णि भूतानि रमंते य एवं वेद ॥१॥ द्वादशं ब्राह्मणं ॥१२॥ उक्थं प्रा
णो वा उक्थं प्राणो हीदं सर्वमुत्थापयत्युद्धास्मादुक्थवि
द्वीरस्तिष्ठत्युक्थस्य सायुज्यं सलोकतां जयति य एवं वेद ॥
॥१॥ यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यं
ते युज्यंते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यं य २
ति सलोकतां जयति य एवं वेद ॥२॥ साम प्राणो वै साम प्राणे हीमा
नि सर्वाणि भूतानि सम्यंचि सम्यंचि हास्मै सर्वाणि भू

65

तानि श्रेष्ठाय कस्मै ते साम्नः सायुज्यं सलोकतां ज
यति य एवं वेद ॥३॥ क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रा
यते हैनं प्राणः क्षणितोः प्र क्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्यं
सलोकतां जयति य एवं वेद ॥४॥ त्रयोदशं ब्राह्मणं ॥ भूमिरंतरि
क्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेत
दु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या
एतदेवं पदं वेद ॥१॥ ऋचो यजूंषि सामानीत्यष्टावक्ष 5
राण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स

यावतीयंत्रयीविद्यातावद्धजयतियोस्याएतदेवंपदंवे
द॥२॥प्राणोपानोव्यानइत्यष्टावक्षराण्यष्टाक्षरंहवा
एकंगायत्र्यैपदमेतदुहैवास्याएतत्सयावदिदंप्राणि
तावद्धजयतियोस्याएतदेवंपदंवेदाथास्याएतदेव
तुरीयंदर्शतंपदंपरोरजायएषतपतियद्वैचतुर्थं
तत्तुरीयंदर्शतंपदमितिददृशइवह्येषपरोरजाइ
तिसर्वमुह्येवैषरजउपर्युपरितपत्येवंहैवश्रिया
यशसातपतियोस्याएतदेवं पदं वेद॥३॥सैषागायत्र्येतस्मि

ऽस्तुरीयेदर्शतेपदेपरोरजमिप्रतिष्ठितातद्वैतत्सत्येप्रति
ष्ठितंचक्षुर्वैसत्यंचक्षुर्हिवैसत्यंतस्माद्यदिदानींद्वौविव
दमानावेयातामहमदर्शमहमश्रौषमितियएवंब्रूयादह
मदर्शमितितस्माएवश्रद्दध्यामतद्वैतत्सत्यंबलेप्रतिष्ठितं
प्राणोवैबलंतत्प्राणेप्रतिष्ठितंतस्मादाहुर्बलंसत्यादोगीय
इत्येवम्वेषागायत्र्यध्यात्मंप्रतिष्ठितासाहैषागयांस्तत्रे
प्राणावैगयास्तत्प्राणांस्तत्रेतद्यद्गयांस्तत्रेतस्माद्गाय बृ
त्रीनामसयाममेवामूंसावित्रीमन्वाहैषैवसासयस्मा ६

अन्वाह तस्य प्राणाꣳस्त्रायते ॥४॥ ताꣳहैतामेके सावित्रीमनु
ष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति न तथा कुर्या
द्गायत्रीमेव सावित्रीमनुब्रूयाद्यदि ह वा अप्येवंविद्बह्विव
प्रतिगृह्णाति न हैव तद्गायत्र्या एकं चन पदं प्रति ॥५॥ स य इ
माꣳस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात्सो स्या एतत्प्रथमं प
दमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णी
यात्सो स्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि
यस्तावत्प्रतिगृह्णीयात्सो स्या एतत्तृतीयं पदमाप्नुया

दध्वास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तप
तिनैव केनचनाप्तं कुत उ एतावत्प्रतिगृह्णीयात्॥६॥ तस्या
उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न
हि पद्यसे॥ नमस्ते तुरीयाय दर्शताय पदाय परोरजसे ऽसावदो
मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवा
स्मै स कामः समृध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा॥
॥७॥ एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच ३
यन्नु हो तद्गायत्रीविदब्रूथा अथ कथं हस्तीभूतो वहसी

तिमुखं०॰ तस्याःसत्याएनविदांचकारेतिहोवाचतस्याअग्नि
रेवमुखंयदिहवाअपिबह्विवाग्नावभ्यादधतिसर्वमेवतत्सं
दहत्येवं०॰ हैवैवंविद्यद्यपिबह्विवपापंकुरुतेसर्वमेवतत्सं
प्सायशुद्धःपूतोजरोमृतःसंभवति॥ ॥१४॥ ब्रौंतांवैंदैंगं॥ ह्री
हिरण्मयेनपात्रेणसत्यस्यापिहितंमुखं॥ तत्त्वंपूषन्नपावृणु
सत्यधर्मायदृष्टयेॅपूषन्नेकर्षेयमसूर्यप्राजापत्यव्यूहरश्मी
न्समूहतेजोयत्तेरूपंकल्याणतमंतत्तेपश्यामियोसाव
सोपुरुषःसोहमस्मि॥ वायुरनिलममृतमथेदंभस्मांतंश

७९ शरीरं॥ ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर अग्ने
नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् यु
योध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥१॥ इति
पंचदशं ब्राह्मणं॥ पंचमोध्यायः समाप्तः॥ नारायणः

बद्धिं वपापं कुरुते सर्वमेवतत्संप्राप्य शुद्धः पूतोऽजरोऽमृतः
संभवति ॥२४॥ चतुर्दशं ब्राह्मणं ॥ हिरण्मयेन पात्रेण स
त्यस्यापिहितं मुखं तत्त्वं पूषंनपावृणु सत्यधर्माय
दृष्टये पूषन्नेकर्षे यमसूर्य प्राजापत्य व्यूह रश्मीन्स
मूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसाव
सौ पुरुषः सोऽहमस्मि ॥ वायुरनिलममृतमथेदं भस्मां
तं॰ शरीरं ॐ क्रतो स्मर कृतं॰ स्मर क्रतो स्मर कृत
ं॰ स्मर ॥ अग्ने नय सुपथा राये अस्मान्वि देव वयुनानि श्वानि
विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते न
म उक्तिं विधेम ॥१॥ १५ ब्राह्मणं ॥ पंचमोऽध्यायः समाप्तः ॥ ५ ॥

६० ॐ योहवैज्येष्ठंचश्रेष्ठंचवेदज्येष्ठश्चश्रेष्ठश्चस्वानां
भवतिप्राणोवैज्येष्ठश्चश्रेष्ठश्चज्येष्ठश्चश्रेष्ठश्चस्वानां
भवत्यपिचयेषांबुभूषतियएवंवेद॥१॥योहवैव
सिष्ठांवेदवसिष्ठःस्वानांभवतिवाग्वैवसिष्ठावसिष्ठः
स्वानांभवत्यपिचयेषांबुभूषतियएवंवेद॥२॥योहवै
प्रतिष्ठांवेदप्रतिहतिष्ठतिसमेप्रतितिष्ठतिदुर्गेचक्षुर्वैप्र
तिष्ठाचक्षुषाहिसमेचदुर्गेचप्रतितिष्ठतिप्रतितिष्ठति
समेप्रतितिष्ठतिदुर्गेयएवंवेद॥३॥योहवैसंपदंवेदस
ंहास्मैपद्यतेयंकामंकामयतेश्रोत्रंवैसंपच्छ्रोत्रेहो १
मेसर्वेवेदाअभिसंपन्नाःसंहास्मैपद्यतेयंकामंका

मयतेयएवंवेद॥४॥योहवाआयतनंवेदायतनꣳस्वा
नांभवत्यायतनंजनानांमनोवाआयतनꣳस्वानांभ
वत्यायतनंजनानांयएवंवेद॥५॥योहवैप्रजातिंवे
दप्रजायतेहप्रजयापशुभीरेतोवैप्रजातिःप्रजाय
तेहप्रजयापशुभिर्यएवंवेद॥६॥तेहेमेप्राणाअहं
ꣳश्रेयसेविवदमानाब्रह्मजग्मुस्तद्धोचुःकोनोवसि
ष्ठइतितद्धोवाचयस्मिन्वउत्क्रांतइदꣳशरीरंपापीयाम
न्यतेसवोवसिष्ठइति॥७॥वाग्घोच्चक्रामसासंवत्सरं
प्रोष्यागत्योवाचकथमशकतमदृतेजीवितुमिति
तेहोचुर्यथाकलाअवदंतोवाचाप्राणंतःप्राणेनप

८१ श्यंतश्चक्षुषाश्टएवंतःश्रोत्रेणविद्वांऽसोमनसाप्रजा
यमानारेतसैवमजीविष्मेतिप्रविवेशहचक्षुः॥८॥चक्षु
र्होच्चक्रामतत्संवत्सरंप्रोष्यागत्योवाचकथमशकततम
दृतेजीवितुमितितेहोचुर्यथाऽअंधाऽपश्यंतश्चक्षुषाप्रा श्री
णंतःप्राणेनवदंतोवाचाश्टएवंतःश्रोत्रेणविद्वांऽसोम
नसाप्रजायमानारेतसैवमजीविष्मेतिप्रविवेशहच
क्षुः॥९॥श्रोत्रंऽहोच्चक्रामतत्संवत्सरंप्रोष्यागत्यो
वाचकथमशकततमदृतेजीवितुमितितेहोचुर्यथाब
धिराऽअश्टएवंतःश्रोत्रेणप्राणंतःप्राणेनवदंतोवा २
चापश्यंतश्चक्षुषाविद्वांऽसोमनसाप्रजायमाना

रेतसैवमजीविष्मेतिप्रविवेशह श्रोत्रं ॥१०॥ मनोहोच्च
क्रामतत्संवत्सरंप्रोष्यागत्योवाचकथमशकतम
दृतेजीवितुमितितेहोचुर्यथाग्धा अविद्वाꣳसोमन मु
नसाप्राणंतःप्राणेनवदंतोवाचापश्यंतःश्चषाश्रृ क्षु
ण्वंतःश्रोत्रेणाप्रजायमानारेतसैवमजीविष्मेतिप्र
विवेशहमनः॥११॥रेतोहोच्चक्रामतत्संवत्सरंप्रोष्या
गत्योवाचकथमशकतमदृतेजीवितुमितितेहोचु
र्यथाक्लीबाअप्रजायमानारेतसाप्राणंतःप्राणे
नवदंतोवाचापश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेण
विद्वाꣳसोमनसैवमजीविष्मेतिप्रविवेशहरेतः॥१२॥

८२ अथ ह प्राण उच्चिक्रमिषन्यथा महासुहयः सैंधवः पड्वी
शशंकून्संवृहेदेवं हैवेमान्प्राणान्संववर्ह ते हो
चुर्मा भगवन्नुत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवि
तुमिति तस्यो मे बलिं कुरुतेति तथेति ॥१४॥ सा ह
वागुवाच यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठो
सीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोसी
ति चक्षुर्यद्वा अहं संपदस्मि त्वं तत्संपदसी
ति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदाय
तनमसीति मनो यद्वा अहं प्रजातिरस्मि
त्वं ^ तत्प्रजातिरसीति रेतस्तस्यो मे किम २

तदायतनमे

न्नंकिंवासइतियदिदंकिंचाश्वभ्यआकृमिभ्यआकीटप
तंगेभ्यस्तत्तेन्नमापोवासइतिनहवाअस्यानन्नंज
ग्धंभवतिनानन्नंपरिगृहीतंयएवमेतदनस्यान्नंवेद
तद्विद्वांसःश्रोत्रियाअशिष्यंतआचामंत्यशित्वाचामंते
तमेवतदनमनग्नंकुर्वंतोमन्यंते॥१४॥प्रथमंब्राह्मणं॥
श्वेतकेतुर्हवाआरुणेयःपंचालानांपरिषदमाजगाम।
सआजगामजैवलिंप्रवाहणंपरिचारयमाणंतमुदीक्ष्या
भ्युवादकुमारा३इतिसभो३इतिप्रतिशुश्रावानुशिष्टो
न्वसिपित्रेत्योमितिहोवाच॥१॥वेत्थयथेमाःप्रजाःप्रय
त्योविप्रतिपद्यंता३इतिनेतिहोवाचवेत्थोयथेमंलो
कंपुनरापद्यंता३इतिनेतिहैवोवाचवेत्थोयथासौ

लोकएवं बहुभिः पुनःपुनःप्रयद्भिर्न संपूर्यंता ३ इतिने
ति हैवोवाच वेछो यति ध्यामाकृत्या ६ कृतायामापःपुरु
षवाचोन्मृत्वा समुच्छ्रायवदंती ३ इति नेति हैवोवाच
वेछो देवयानस्य वा पथः प्रतिपदं पिन्टयाणस्य वाप
मृत्वा देवयानं वा पंथानं प्रतिपद्यंते पितृयाणं वापिपि
नऋषेर्वचः श्रुतं द्वे सृती अशृणवं पितृणामहं दे न ५ ४
वानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यदंत
रा पितरं मातरं चेति नाहमतएकं चन वेदेति होवाच ॥२९॥
हे२ ऽथैनं वसत्योपमंत्रयां चक्रे नादृत्य वसतिं कुमारः
मा प्रदुद्राव सप्राजगाम पितरं तं ह होवाचेति वाव कि
ल नो भवान् पुरानुशिष्टानवोच इति कथं सुमेध

इति पंचमा प्रश्नान्राजन्यबंधुरप्राक्षीत्ततो नैकं
चन वेदेति कतमे त इतीम इति ह प्रतीकान्युदा
जहार॥४॥ स होवाच तथा नस्त्वं तात जानीथा यथा य
दहं किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य
ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति स आजगा
म गौतमो यत्र प्रवाहणस्य जैवलेरास तस्मा आसनमा
हृत्योदकमाहारयांचकाराथ हास्मा अर्घ्यं चकार तं
ह होवाच वरं भगवते गौतमाय दद्म इति॥१॥ स होवाच प्र
ग ३ तिज्ञातो म एष वरो यां तु कुमारस्यांते वाचमभाष था
स्तामेव ब्रूहीति॥२॥ स होवाच दैवेषु वै गौतम तद्वरेषु

मानुषाणां ब्रूहीति ॥२०॥ स होवाच विज्ञायते हास्ति हिर
ण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिधानस्य
मानो भवान् बहोरनंतस्यापर्यंतस्याभ्यवदान्यो भूदि
ति स वै गोतम तीर्थेनेछासा इत्युपैम्यहं भवंतमिति वा
चा ह स्मैव पूर्व उपयंति स होपायन कीर्त्या उवास ॥२१॥
स होवाच तथा नस्त्वं गोतम मापराधास्तव च पितामहा
यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां
त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवंतमर्हति प्रत्या
ख्यातुमिति ॥२२॥ असौ वै लोकोग्निर्गौतम तस्यादि ५
त्य एव समिद्रश्मयो धूमो हरर्चिर्दिशोंगारा अवां

तरदिशोविस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौदेवाःश्रद्धां
जुह्वतितस्याआहुत्यैसोमोराजासंभवति॥२३॥
पर्जन्योवाअग्निर्गौतमतस्यसंवत्सरएवसमिदभ्रा
णिधूमोविद्युदर्चि [illegible] रशनिरंगाराह्रादुनयोविस्फुलिंगा
तस्मिन्ने तस्मिन्नग्नौदेवाःसोमंराजानंजुह्वतितस्याआ
हुत्यैवृष्टिःसंभवति॥२४॥पृथ्वीवैलोकोऽग्निर्गौतम
ता स्यपृथिव्येवसमिदग्निर्धूमोरात्रिरर्चिश्चंद्रमाअं
गारानक्षत्राणिविस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ
देवावृष्टिंजुह्वतितस्याआहुत्याअन्नंसंभव
ति॥२५॥पुरुषोवाअग्निर्गौतमतस्यव्यात्तमे

८५ वसमित्प्राणोधूमोवागर्चिश्चक्षुरंगाराःश्रोत्रंविस्फु
लिंगास्तस्मिन्नेतस्मिन्नग्नौदेवाअन्नंजुह्वतितस्या
आहुत्यैरेतःसंभवति॥१२॥योषावाअग्निर्गौतमत
स्याउपस्थएवसमिल्लोमानिधूमोयोनिरर्चिर्यदंतः
करोतितेंगाराअभिनंदाविस्फुलिंगास्तस्मिन्नेत
स्मिन्नग्नौदेवारेतोजुह्वतितस्याआहुत्यैपुरुषःसं
भवतिसजीवतियावज्जीवत्यथयदाम्रियते॥१३॥
अथैनमग्नयेहरंतितस्याग्निरेवाग्निर्भवतिस
मित्समिद्धूमोधूमोर्चिरर्चिरंगाराअंगाराविस्फुलिं ९
गाविस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौदेवाःपुरुषं

ज्क्तितस्याआहुत्यैपुरुषोभाःस्वरवर्णःसंभवति॥२८
तेयएवमेतद्विदुर्येचामीअरण्येश्रद्धांसत्यमुपा
सतेतेर्चिरभिसंभवंत्यर्चिषोहरह्नआपूर्यमाणप
क्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङादित्यएति
मासेभ्योदेवलोकंदेवलोकादादित्यमादित्याद्वैद्युतंता
न्वैद्युतान्पुरुषोमानसएत्यब्रह्मलोकान्गमयतितेते ति
षुब्रह्मलोकेषुपराःपरावतोवसंतेषांनपुनरावृ
त्तिः॥२९॥अथयेयज्ञेनदानेनतपसालोकान्ज
यंतितेधूममभिसं भवंतिधूमाद्रात्रिंरात्रेर
पक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मा

६ पुनः पुरुषाग्नौ हूयंते ततो योषाग्नौ जायंते ते लोकान्प्रत्युत्थायिन ६

८५ सान्दक्षिणादित्य एति मासेभ्यः पितृलोकंपितृलो
काच्चंद्रं ते चंद्रंप्राप्यान्नं भवंति तांस्तत्र देवा यथा
सोमं राजानमाप्याय स्वापक्षीय स्वेत्येवमेनां
स्तत्र भक्षयंति तेषां यदा तत्पर्यवैत्यथेममेवाका
शमभिनिष्पद्यंत आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः
पृथिवीं ते पृथिवीं प्राप्यान्नं भवंति त एवमेवानु
परिवर्त्तंते ॥ अथ य एतौ पंथानौ न विदुस्ते कीटाः
पतंगा यदिदं दंदशूकं ॥ २० ॥ द्वितीयं ब्राह्मणं ॥ स यः
कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाण १
पक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुं

३ ८५

बरे कंसे चमसे वा सर्वौषधं फलानीति संभृत्य
परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्या ए३
वृताज्यं संस्कृत्य पुंसा नक्षत्रै मंथं संनीय जुहो
ति यावंतो देवास्त्वयि जातवेदस्तिर्यंचो घ्नंति पुरुष
स्य कामानूते भ्योहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः
कामैस्तर्पयंतु स्वाहा ॥ या तिरश्ची निपद्यतेहं विध
रणीइति तां त्वा घृतस्य धारया यजे संराधनीम
हं स्वाहा ॥१॥ ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हु
त्वा मंथे संस्रवमवनयति प्राणाय स्वाहा वसि
ष्ठाये स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति वा

चे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मंथे सं०स्रव
मवनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा
मंथे सं०स्रवमवनयति श्रोत्राय स्वाहायतनाय
स्वाहेत्यग्नौ हुत्वा मंथे सं०स्रवमवनयति मनसे स्वा
हा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मंथे सं०स्रवमवन
यति रेतसे स्वाहेत्यग्नौ हुत्वा मंथे सं०स्रवमवन
यति ॥२॥ अग्नये स्वाहेत्यग्नौ हुत्वा मंथे सं०स्र
वमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मंथे सं०
स्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मंथे सं०स्र ८
वमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मंथे सं०स्र

वमवनयति स्वः स्वाहेदं त्यग्नौ हुत्वा मंथे स०ः स्रुवमव
नयति भूर्भुवः स्वः स्वाहेदं त्यग्नौ हुत्वा मंथे स०ः स्रु
वमवनयति ब्रह्मणे स्वाहेदं त्यग्नौ हुत्वा मंथे स०ः स्रु
वमवनयति रुद्राय स्वाहेदं त्यग्नौ हुत्वा मंथे स०ः
स्रुवमवनयति ऋताय स्वाहेदं त्यग्नौ हुत्वा मंथे
स०ः स्रुवमवनयति भविष्यते स्वाहेदं त्यग्नौ हुत्वा
मंथे स०ः स्रुवमवनयति विश्वाय स्वाहेदं त्यग्नौ
हुत्वा मंथे स०ः स्रुवमवनयति सर्वाय स्वाहेदं त्यग्नौ हु
त्वा मंथे स०ः स्रुवमवनयति प्रजापतये स्वाहेदं
त्यग्नौ हुत्वा मंथे स०ः स्रुवमवनयति ॥३॥ अग्नये

नमांसि मृशाति ध्रम मसि ज्वलदसि प्रतीमसि प्रस्त
ब्रुमस्येकश ममसि दिं क्रुतमसि दिं क्रीयमाणास्तु
ज्ञीथमस्तु ज्ञीयमानमसि आवितमसि प्रत्यात्रा
वितमस्याईसंदीप्तमसि विज्वरसि प्रज्वर स्यन्न
मसि ज्योतिरसि निधनमसि संवर्गोसीति ॥४॥
अथे नमुद्य छ्यामहेःस्यामहेः दितेमहि । सद्सिराजे
शानोधिपतिः समाह्वराजेशानोधिपतिं करोत्विति
॥५॥ अथेनमाचामति तत्सवितुर्वरेण्यं मधुवाता ९
ऽऋतायते मधुक्षरंति सिंधवः ॥ माध्वीर्नः संत्वो
षधीः । भूः स्वाहा । भर्गो देवस्य धीमहि । मधुनक्त

८९ मुतोषसो मधुमत्पार्थिवꣳ रजः मधु द्यौरस्तु नः पिता।
यो० २ नुवः स्वाहा धियो यो नः प्रचोदयात्। मधुमान्नो व
नस्पतिर्मधुमाँऽअस्तु सूर्यः माध्वीर्गावो भवं
तु नः। स्वः स्वाहेति सर्वं च सावित्रीमन्वाह सर्वाश्च
मधुमतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः
स्वाहेत्यंततत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्रा
क्शिराः संविशति प्रातरादित्यमुपतिष्ठते। दिशामे
कपुंडरीकमस्यहं मनुष्याणामेकपुंडरीकं भूयासमि
ति पथेतमेत्य ऽ उपचनेनाग्निमासीनो वꣳशं ऽ उपति। ८॥
तद्ध हैतदुद्दालक आरुणिर्वाजसनेयाय याज्ञव

ल्क्यायांतेवासिनउक्त्वोवाचापियएनंशुष्केस्थाणौ
निषिंचेज्जायेरंछाखाःप्ररोहेयुःपलाशानीति॥७॥एत
मुहैववाजसनेयोयाज्ञवल्क्योमधुकायपैंग्यायांते
वासिनउक्त्वोवाचापियएनंशुष्केस्थाणौनिषिंचेज्जा
येरंछाखाःप्ररोहेयुःपलाशानीति॥८॥एतमुहैवम
धुकःपैंग्यश्चूलायभागवित्तयेंतेवासिनउक्त्वोवा
चापियएनंशुष्केस्थाणौनिषिंचेज्जायेरंछाखाः
प्ररोहेयुःपलाशानीति॥९॥एतमुहैवचूलोभाग
वित्तिर्जानकयआयस्थूणायांतेवासिनउक्त्वोवा १०
चापियएनंशुष्केस्थाणौनिषिंचेज्जायेरंछाखाः

प्ररोहेयुःपलाशानीति॥१॥एतमुहैवजानकिरायस्थूणःसत्यका
मायजाबालायांतेवासिनउक्त्वोवाचापियएनंशुष्केस्था
णौनिषिंचेज्जायेरंछाखाःप्ररोहेयुःपलाशानीति॥११॥एत
मुहैवसत्यकामोजाबालोंतेवासिभ्यउक्त्वोवाचापियएनं
शुष्केस्थाणौनिषिंचेज्जायेरंछाखाःप्ररोहेयुःपलाशानीति
तमेतन्नापुत्रायवानंतेवासिनेवाब्रूयात॥१२॥चत्वरौदुंब ५६
ब रोभवत्यौदुंबरःस्रुवऔदुंबरश्चमसऔदुंबरइध्मऔदुं
बर्याउपमंथन्योदशग्राम्याणिधान्यानिभवंतिव्रीहियवा
स्तिलमाषाअणुप्रियंगवोगोधूमाश्चमसूराश्चखल्वा
श्चखलकुलाश्चतानपि[illegible]न्दधनिमधुघृतउपसिंचत्या
नि

ज्यस्य यज्ञ होति ॥१२॥ इतियं ब्राह्मणं ॥ एषां वै भूतानां पृथि
वी रसः पृथिव्या आपोऽपाम् ओषधय ओषधीनां पुष्पाणि
पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥१॥ स ह प्रजा
पतिरीक्षां चक्रे हंतास्मै प्रतिष्ठां कल्पयानीति स स्त्रियं
ससृजे तां सृष्ट्वाध उपास्त तस्मात्स्त्रियमध उपासीत स
एतं प्रांचं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृज
त् ॥२॥ तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समि
द्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य
लोको भवति तावानस्य लोको भवति य एवं विद्वानधो ३३
पहासं चरत्यासां स्त्रीणां सुकृतं वृङ्क्तेऽथ य इदमविद्वा

नच्चोपहासंचरत्यास्यस्त्रियःसुकृतंवृंजते॥३॥एतद्धस्मवै
तद्विद्वानुद्दालकआरुणिराहैतद्धस्मवैतद्विद्वान्नाको
मौद्गल्यआहैतद्धस्मवैतद्विद्वान्कुमारहारितआहब
हवोमर्त्याब्राह्मणायनानिरिंद्रियाविसुकृतोस्माल्लोका
त्प्रयंतियइदमविद्वांसोधोपहासंचरंतीतिबहुवाइदं
सुप्तस्यवाजाग्रतोवारेतःस्कंदति॥४॥तदभिमृशेदनुवा
मंत्रयेतयन्मेद्यरेतःपृथिवीमस्कांत्सीद्यदोषधीरप्यसर
द्यदपःइदमहंतद्रेतआददेपुनर्मामैत्विंद्रियंपुनस्तेजःपु
नर्भगःपुनरग्निर्धिष्ण्यायथास्थानंकल्पंतामित्यनामि
कांगुष्ठाभ्यामादायांतरेणस्तनौवाभ्रुवौवानिमृंज्यात्॥५॥
अथयद्युदकआत्मानंपरिपश्येत्तदभिमंत्रयेतमयितेजइं
द्रि

९१ न्द्रियं यशो द्रविणं सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलो
द्वासास्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमंत्र
येत ॥६॥ सा चेदस्मै न दद्यात्काममेनामवक्रीणीयात्सा चेद
स्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्राम
दिंद्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥७॥ सा
चेदस्मै दद्यादिंद्रियेण ते यशसा यश आदधामीति यशस्वि
नावेव भवतः ॥८॥ स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय
मुखेन मुखं संधायोपस्थमस्या अभिमृश्य जपेदंगा दंगा
सं भवसि हृदयादधिजायसे स त्वमंगकषायोसि दिग्ध
विद्धामिव मादयेमाममूं मयीति ॥९॥ अथ यामिच्छेन्न ग ९२
र्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं संधाय

श्री
२

निप्राण्यापान्यादिंद्रियेणतेरेतसारेतआददइत्यरेताए
वभवति॥१०॥अथयामिच्छेद्दधीतेतितस्यामर्थंनिष्ठायमु
खेनमुखंसंधायापान्याभिप्राण्यादिंद्रियेणतेरेतसारे
तआदधामीतिगर्भिण्येवभवति॥११॥अथयस्यजायायै
पा५ जारःस्यात्तंचेद्द्विष्यादामपात्रेऽग्निमुपसमाधायप्रतिलोमं
शरबर्हिस्तीर्त्वातस्मिन्नेताःशरभृष्टीःप्रतिलोमाःसर्पिषा
क्ताजुहुयान्ममसमिद्धेहौषीःप्राणापानौतआददेसाविति
ममसमिद्धेहौषीःपुत्रपशूंस्तआददेसावितिममसमि
द्धेहौषीरिष्टासुकृतेतआददेसावितिममसमिद्धेहौषीरा
शापराकाशौतआददेसावितिसवाएषनिरिंद्रियोविसुकृ
दस्माल्लोकात्प्रेतियमेवंविद्ब्राह्मणःशपतितस्मादेवंवि

९२ श्रोत्रियस्यदारेणनोपहासमिच्छेदुतह्येवंवित्परोभवति॥१२

य अथयस्यजायामार्त्तवंविंदेत्र्यहंकंसेनपिबेदहतवासानैनां

वृषलोनवृषल्युपहन्यात्त्रिरात्रांतआप्लुत्यव्रीहीनवघात ह२

येत॥१३॥सयइच्छेत्पुत्रोमेशुक्लोजायेतवेदमनुब्रुवीतस

र्वमायुरियादितिक्षीरोदनंपाचयित्वासर्पिष्मंतमश्नीयातामी म

श्वरोजनयितवै॥१४॥अथयइच्छेत्पुत्रोमेकपिलःपिंगलोजा

येतद्वौवेदावनुब्रुवीतसर्वमायुरियादितिदध्योदनंपाच

यित्वासर्पिष्मंतमश्नीयातामीश्वरौजनयितवै॥१५॥अथय

इच्छेत्पुत्रोमेश्यामोलोहिताक्षोजायेतत्रीन्वेदाननुब्रुवी

तसर्वमायुरियादित्युदौदनंपाचयित्वासर्पिष्मंतमश्नीयाता

मीश्वरौजनयितवै॥१६॥अथयइच्छेद्दुहितामेपंडिता

जायेतसर्वमायुरियादितितिलौदनंपाचयित्वासर्पिष्मं

सर्वान्वेदाननुब्रवीत१

तमश्नीयातामीश्वरोऽजनयितवे ॥८७॥ अथयद्इछेत्पुत्रो
मेपंडितोविजिगीथः समितिंगमः शुश्रूषितांवाचंभाषि
ताजायेतसर्वान्वेदाननुब्रुंतसर्वमायुरियादितिमाठसो वि
दनंपाचयित्वासर्पिष्मंतमश्नीयातामीश्वरोजनयितवाओ
क्ष्णेणवाआर्षभेणवा ॥१८॥ अथाग्निप्रातरेवस्थालीपाकावृ
ताज्यंचेष्टित्वास्थालीपाकस्योपघातंजुहोत्यग्नयेस्वाहा
प्रा ४ नुमतयेस्वाहादेवायसवित्रेसत्यप्रसवायस्वाहेतिहुत्वा
हुस्यप्राश्नातिशेष्येतरस्याःप्रयछतिप्रक्षाल्यपात्रीउदपा
त्रंपूरयित्वातेनैनांत्रिरभ्युक्षत्युत्तिष्ठातोविश्वावसोन्या
मिछप्रपूर्व्याठःसंजायांपत्यासहेति ॥१९॥ अथैनामभिप
द्यतेमोहमस्मिसात्वंठःसात्वमस्यमोऽहंसामाहमस्मिऋ

८३ कं घोरदं पृथिवी त्वं। तावेहि सऽंरभावहै संरेतोदधावहै पुं ह१
ऽं सेपुत्रायवित्तयइति॥१०॥ अथास्या ऊरू विहापयति विजि
हीथां द्यावापृथिवीइति तस्यामर्थं निष्ठाय मुखेनमुखऽं सं
धायत्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रू व
पाणिपिऽंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते॥
गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके॥ गर्भं ते अश्विनौ
देवावाधत्तां पुष्करस्रजौ॥११॥ हिरण्मयी अरणी याभ्यां
निर्मंथतामश्विनौ तं ते गर्भंऽं हवामहे दशमे मासि सूत
ये॥ यथाग्निगर्भा पृथिवी यथा द्यौरिंद्रेण गर्भिणी॥ वा ३४
युर्दिशां यथा गर्भ एवं गर्भं दधामि तेसाविति॥१२॥ सोष्यंतीमद्भिर
भ्युक्षति यथा वायुः पुष्करिणींऽं समिंजयति सर्वतः एवा ते गर्भ

एडतुसहावैतुजरायुणा। इंद्रस्यायंव्रजः कृतः सार्गलः सपरिश्र
यः तस्मिं इन्निर्जहि गर्भेणसावराᳪसहेति॥२३॥ जातेग्निमुपसमा
धायांक आधाय कंᳪसे पृषदाज्यंᳪसंन्नीय पृषदाज्यस्योपघातंजु
होत्यस्मिन्सहस्रंपुष्यासमेधमानः स्वेगृहे अस्योपसद्यांमाछैत्सी
त्प्रजयाचपशुभिश्चस्वाहा मयिप्राणांᳪस्त्वयिमनसाजुहोमिस्वाहा
यत्कर्मणात्यरीरिचंयद्वान्यूनमिहाकरं॥ अग्निष्टत्स्विष्टकृद्विद्वा
न्स्विष्टᳪसुहुतंकरोतुनःस्वाहेति॥२४॥ अथास्यदक्षिणंकर्णमभि
निधायवाग्वागितित्रिरथदधिमधुघृतᳪसंन्नीयानंतर्हितेन
जातरूपेणप्राशयति भूस्तेदधामिभुवस्तेदधामिस्वस्तेदधा
मिभूर्भुवःस्वः सर्वंत्वयिदधामीति॥२५॥ अथास्यनामकरोति
वेदोसीतितदस्यतद्गुह्यमेवनामभवति॥२६॥ अथैनंमात्रे
प्रदायस्तनंप्रयच्छतियस्तेस्तनःशशयोयोमयोभूर्यैरत्नधा

२४ वसुविद्यः सुदत्रः। येन विश्वा पुष्यसि वार्याणि सरस्वति तमि
ह धातवे करिति॥२७॥ अथास्य मातरमभिमंत्रयत इलासि
मैत्रावरुणी वीरे वीरमजीजनत् सा त्वं वीरवती भव यास्मा उ२
न्वीरवतोऽकरदिति तं वा एतमाहुरतिपिता बताभूरतिपि
तामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मव
य र्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति॥२८॥ चतुर्थं ब्राह्मणं॥
षा अथ वंशः। पौतिमाषीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रो
~~गौतमीपुत्राद्गौतमीपु~~त्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पा
राशरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रादौपस्वस्तीपुत्रः १५
पाराशरीपुत्रात्पाराशरीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रः
कौशिकीपुत्रात्कौशिकीपुत्र आलंबीपुत्राच्च वैयाघ्रपदी

पुत्राद्वैयाघ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापी
पुत्रः ॥१॥ आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भा
रद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वात्सी
पुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्रा
द्वार्कारुणीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागी
पुत्रादार्तभागीपुत्रः शौंगीपुत्राच्छौंगीपुत्रः सांकृतिपुत्रात्सां
कृतीपुत्र आलंबायनीपुत्रादालंबायनीपुत्र आलंबीपु
त्रादालंबीपुत्रो जायंतीपुत्राज्जायंतीपुत्रो मांडूकायनीपुत्रान्मां
डूकायनीपुत्रो मांडूकीपुत्रान्मांडूकीपुत्रः शांडिलीपुत्राच्छां
डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भा

९५ लुकीपुत्रः क्रौंचिकीपुत्राभ्यां क्रौंचिकीपुत्रौ बैदभृतीपुत्राद्वै
दभृतीपुत्रः कार्शिकेयीपुत्रात्कार्शिकेयीपुत्रः प्राचीनयोगी
पुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नी
पुत्रात्प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्रआसुरायणादा
सुरायणआसुरेरासुरिः ॥२॥ याज्ञवल्क्याद्याज्ञवल्क्यउ
द्दालकादुद्दालकोरुणादरुणउपवेशेरुपवेशिः कुश्रेः १०१
कुश्रिर्वाजश्रवसोवाजश्रवाजिह्वावतोबाध्योगाज्जिह्वा
न्२ वांबाध्योगोसितादार्षिगणादसितोवार्षिगणोहरितात्क ९६
श्प श्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्य
पान्नैध्रुवेः कश्यपो नैध्रुविर्वाचोवागंभिण्या अंभिण्या

स्वो

९६ दित्यादादित्यानीमानिशुक्लानियजूंषिवाजसनेयेनया
ज्ञवल्क्येनाख्यायंते ॥ समानमासांजीवीपुत्रात्सांजीवीपु
त्रोमांडूकायनेर्मांडूकायनिर्मांडव्यान्मांडव्यःकौत्सात्कौत्सो
माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणःशांडिल्याच्छां
डिल्योवात्स्याद्वात्स्यःकुश्रेःकुश्रिर्यज्ञवचसोराजस्तंबायना
द्यज्ञवचाराजस्तंबायनस्तुरात्कावषेयात्तुरःकावषेयःप्रजा
पतेःप्रजापतिर्ब्रह्मणोब्रह्मस्वयंभुब्रह्मणेनमः॥ ॐतद्ब्र
ह्मार्पणमस्तु इतिषष्ठोध्यायःसमाप्तः॥ ब्रह्मैवसत्यं ॐ १०८

२०

श्रीः। बृहदारण्यकोपनिषत्प्रारंभः। षडध्यायात्मिकेयमुपनिषत्।
तत्रप्रथमाध्यायारंभः उषा वा अश्वस्य मेध्यस्य शिर इति। समाप्ति
द्वितीयाध्यायारंभः। पत्राणि १३ अथो ह दृप्तबालाकिर्हानूचानो गार्ग्य आस इति। स॰ कि॰ १९
अथ तृतीयाध्यायारंभः। जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे इति। स॰ २०।
अथ चतुर्थाध्यायारंभः। जनको वैदेह आसांचक्रे इति। स॰ २२। अथ पं
चमाध्यायारंभः। पूर्णमदः पूर्णमिदं। त्रयः प्राजापत्याः प्रजापतौ पितरि ब्र
ह्मचर्यमूषुः। स॰ ८। अथ षष्ठाध्यायारंभः। यो ह वै ज्येष्ठं च श्रेष्ठं च वेद
इति। स॰ १७। इति षडध्यायाः।

१५

१३६

१००

६

इतिबृहदारण्यकंसमाप्तं

100/8

"पंचमषष्ठाध्यायौ"